प्राकृतः -ती -तं, घनः -ना -नं; 'the material world,' भूतसृष्टिः f., भूतसर्गः, भूतसंसारः; 'material universe,' ब्रह्माण्डः -ण्डं; 'material body,' स्थूलशरीरं.—(Substantial) वास्तविकः -की -कं, वास्तवः -वी -वं, सारवान् -वती &c., मूर्त्तिमान् &c., घनः -ना -नं.—(Important) गुरुः -र्वी -रु, गुर्वर्थः -र्था -र्थं, गुरुप्रभावः -वा -वं, परमार्थः -र्था -र्थं, अलघुः -घुः -घु, मुख्यः -ख्या -ख्यं, आवश्यकः -की -कं, प्रधान in comp.; 'material cause,' उपादानं, उपादानकारणं, समवायिकारणं.

MATERIAL, s. साधनं, उपकरणं, द्रव्यं, साधनद्रव्यं, पदार्थः, वस्तु n., मूर्त्तिः f., सारः, घनः, मात्रा; 'materials, collectively,' साधनं -नानि n. pl., सामग्र्यं -ग्री, द्रव्यसामग्र्यं, सम्भारः, द्रव्यसम्भारः, उपकरणसम्भारः, सज्जा, परिच्छदः; 'writing-materials,' लेखसाधनं, लिपिसज्जा; 'the material of cloth,' वस्त्रयोनिः f.

MATERIALISM, s. देहात्मवादः, अनात्मवादः, अनात्ममतं, लोकायतं, चार्वाकमतं.

MATERIALIST, s. देहात्मवादी m. (न्), अनात्मवादी m., लौकायतिकः, लोकायतिकः, विषयी m. (न्), विषयायी m. (न्), चार्वाकमतावलम्बी m. (न्), चार्वाकमतधारी m.

MATERIALITY, s. भौतिकत्वं, आधिभौतिकत्वं, मूर्त्तिमत्त्वं, अनात्मिकत्वं.

MATERIALLY, adv. वस्तुतस्, अर्थतस्, सारतस्, प्रकृतितस्, पदार्थतस्, तत्त्वतस्, अवश्यं, विशेषतस्.

MATERIALNESS, s. See MATERIALITY. (Importance) गौरवं, गुरुत्वं.

MATERNAL, a. मातृकः -की -कं, मातृसम्बन्धी -न्धिनी -न्धि (न्), मातृयोग्यः -ग्या -ग्यं, मातृधर्म्मिकः -का -कं; 'maternal affection,' अपत्यस्नेहः, वात्सल्यं; 'maternal duty,' मातृधर्म्मः.

MATERNITY, s. मातृत्वं -ता, मातृभावः, मातृकत्वं, मातृधर्म्मः, जननीत्वं.

MATHEMATIC, MATHEMATICAL, a. (Relating to mathematics) गणितसम्बन्धी -न्धिनी -न्धि (न्), गणितविषयः -या -यं, गणितविद्यासम्बन्धी &c., संख्यापरिमाणविद्यासम्बन्धी &c., रेखाबीजादिगणितविषयः -या -यं.—(According to the principles of mathematics) गणिततत्त्वानुसारी -रिणी &c., गणितानुरूपः -पा -पं, गणितविद्यानुसारी &c.

MATHEMATICALLY, adv. गणितविद्यानुसारेण, गणितानुरूपेण, गणितशास्त्रवत्.

MATHEMATICIAN, s. गणितविद्याज्ञः, संख्यापरिमाणविद्याज्ञः, रेखाबीजादिगणितविद् m., गणितशास्त्रज्ञः, क्षेत्रपरिमापकविद्यावान् m. (त्), गणनाविद्याज्ञः, गणितज्ञः.

MATHEMATICS, s. pl. गणितं, गणितविद्या, संख्यापरिमाणविद्या, गणनाविद्या, रेखाबीजादिगणितं, रेखाबीजादिगणितविद्या, पाटीबीजादिगणितविद्या, रेखादिगणितं, बीजादिगणितं, गणितशास्त्रं, बीजादिगणितशास्त्रं, क्षेत्रादिपरिमाणविद्या, मानविद्या.

MATIN, a. (Relating to the morning) प्रातःकालिकः -की -कं, प्रातःकालीनः -ना -नं, औषिकः -की -कं, प्रगेतनः -नी -नं, वैयुष्टः -ष्टी -ष्टं.

MATINS, s. pl. प्रातःकृत्यं, प्रातर्भजनं, प्रातःस्मरणं, प्रातःपूजा.

MATRICE, s. (Womb) गर्भाशयः, योनिः m. f., गर्भकोशः, जरायुः m.—(Of a type) मुद्राक्षरसंस्कारः, मुद्राक्षरगर्भः, मुद्राक्षराकारः.

MATRICIDE, s. (The act) मातृहत्या, मातृवधः, मातृघातः, जननीवधः.—(The killer) मातृहन्ता m. (न्तृ), मातृहा m. (न्), मातृघातुकः, मातृघातकः, मातृघाती m. (न्), मातृघ्नः.

*To* MATRICULATE, v. a. संस्कारपूर्व्वं or नामाभिलिखनपूर्व्वं विद्यालयं प्रविश् (c. 10. -वेशयति -यितुं).

MATRICULATED, p. p. संस्कारपूर्व्वं विद्यालयप्रवेशितः -ता -तं.

MATRICULATION, s. संस्कारपूर्व्वं or नामाभिलेखनपूर्व्वं विद्यालयप्रवेशनं.

MATRIMONIAL, a. वैवाहिकः -की -कं, उद्वाहिकः -का -कं, औद्वाहिकः -की -कं, उद्वाही -हिनी -हि (न्), विवाही &c., विवाहसम्बन्धी -न्धिनी &c., पाणिग्रहणिकः -की -कं.

MATRIMONIALLY, adv. विवाहनियमानुसारेण, विवाहरीत्यनुरूपेण, विवाहविधिवत्.

MATRIMONY, s. विवाहः, उद्वाहः, परिणयः, पाणिग्रहः -हणं, पाणिग्राहः, उपयमः, उपयामः, विवाहावस्था, विवाहितावस्था.

MATRIX, s. गर्भाशयः, गर्भकोशः, योनिः m. f. *See* MATRICE.

MATRON, s. कुटुम्बिनी, गृहिणी, गेहिनी, कौटुम्बिकी, जननी, मध्यमवयस्का, पुत्रवती, प्रजावती, पुत्रिणी, सुतिनी, पतिपुत्रवती, प्रौढा, प्रौढस्त्री, वीरा, पुरन्ध्री -न्ध्रिः f., त्रयी, विजाता.

MATRONLY, a. कुटुम्बिनीयोग्यः -ग्या -ग्यं, पुरन्ध्रियोग्यः &c., गृहिणीयोग्यः &c., पुत्रिणीयोग्यः &c., गम्भीरा, धीरा, मध्यमवयस्का.

MATTED, p. p. or a. (Laid with mats) कटी -टिनी -टि (न्), कटास्तीर्णः -र्णा -र्णं; 'matted hair,' जटा, सटा, जटिः, जुटकं, जूटः; 'having matted hair,' जटी -टिनी &c., जटिलः -ला -लं, जटावान् -वती -वत् (त्).

MATTER, s. (Body, substance, not spirit, that which is visible) मूर्त्तिः f., वस्तु n., द्रव्यं, अनात्मद्रव्यं, अनात्मा, अनात्मीयवस्तु n., अनात्मिकवस्तु n., भूतात्मकवस्तु n., पाञ्चभौतिकवस्तु n., मूर्त्तिमद्वस्तु n., साकारवस्तु n., घनवस्तु n., घनद्रव्यं, घनः, दृश्यस्पृश्यवस्तु n., सारः, विषयः, शरीरं.—(Cause of the material world or substratum of the universe) प्रकृतिः f., प्रधानं, माया.—(Material cause, materials, that of which any thing is composed) साधनं, साधनवस्तु n., साधनभूतवस्तु, प्रकृतिः f., सारः, उपकरणं, कारणं, उपादानं, उपादानकारणं.—(Thing) द्रव्यं, वस्तु n., अर्थः, पदार्थः.—(Subject) विषयः, प्रकरणं, वस्तु n., अर्थः, पदं, प्रस्तावः, प्रसङ्गः, सारः, वृत्तान्तः, विधिः m., आस्पदं; 'matter in hand,' प्रस्तुतं; 'an important matter,' परमार्थः, गुर्व्वर्थः; 'an unimportant matter,' लघ्वर्थः, लघुविषयः, अल्पविषयः, स्वल्पविषयः; 'matter of dispute,' विवादास्पदं, विवादविषयः, वादविषयः; 'what is the matter?' को वृत्तान्तः.—(Cause) प्रयोजनं, हेतुः m., प्रयोगः, कारणं.—(Import, consequence) अर्थः, गौरवं, गुरुत्वं, प्रभावः; 'of no matter,' अनर्थकः -का -कं, निरर्थकः -का -कं, निष्प्रभावः -वा -वं, अगुरुः -र्वी -रु.—(Business, affair) कर्म्म n. (न्), कार्य्यं, विषयः, व्यापारः, अर्थः, प्रयोगः.—(Pus, purulent matter) पूयं, पूयरक्तं, पूयशोणितं दूष्यं, मलजं, क्षतजं, प्रसितं, अवक्लेदः.

*To* MATTER, v. n. (Be of importance) expressed by अर्थ in comp. or प्रभाव in comp.; as, 'it matters not,' निरर्थकं or अनर्थकं भवति; 'to matter but little,' लघ्वर्थः -र्था -र्थं or अल्पार्थः -र्था -र्थं or लघुप्रभावः -वा -वं भू; 'to matter greatly,' गुर्व्वर्थः -र्था -र्थं or गुरुप्रभावः -वा -वं भू, प्रभू.—(Form purulent matter) पूय् (c. 1. पूयते -यितुं), सपूयः -या -यं भू, पूयपूर्णः -र्णा -र्णं भू, पूयगर्भः -र्भा -र्भं भू.

MATTERY, a. (Purulent) पूययुक्तः -क्ता -क्तं, सपूयः -या -यं, पूयपूर्णः -र्णा -र्णं, पूयगर्भः -र्भा -र्भं, पूयस्रावी -विणी -वि (न्), पूयविशिष्टः -ष्टा -ष्टं.

MATTOCK, s. खनित्रं, खात्रं, शैलभित्तिः f., पाषाणदारणः, टङ्कः, स्तम्बहननी.

MATTRESS, s. तूलिका, तूला -ली, आस्तरणं, वोरपट्टी, तूलादिनिर्म्मितम् आस्तरणं, आस्तरः, प्रस्तरः, संस्तरः, स्तरिमा m. (न्), शयनीयं.

*To* MATURATE, v. a. पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पाकं कृ or जन् (c. 10. जनयति -यितुं), सपूयं -यां कृ.

*To* MATURATE, v. n. पक्वः -क्वा -क्वं भू, परिपक्वीभू, पूयपूर्णः -र्णा -र्णं भू,